This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/



का०१

पुनः कथंभूतां वनार्द्रां जलेन आर्द्रां ४

श्रीगणेशायनमः॥ कश्चिद् दिग्निर्दिष्टनामा पुरुषः रमां वक्ष्यमाणां वाचं वनितां बभाषे॥ उक्तवान्॥ किं कुर्वन्॥ वनं काननं विचरन्॥ कथंभूतं वनं॥ बहु
वनं बहूनि वनानि उदकानि यत्र तत् बहुवनं॥ बहूदकमित्यर्थः॥ वनं काननजीवनयोरित्यमरः॥ किंदृशो ना॥ वयस्थः॥ वयसि तारुण्ये स्थितो वयस्थः॥ वयस्थ
स्तरुणे पुंवेत्यमरः॥ वयः पक्षि[illegible] बाल्यादौ वयो यौवनमात्रेऽपि निश्चः॥ किंभूतां वनितां॥ वश्यां॥ आत्माधीनां॥ पुनः कथंभूतां॥ वनात्मवदनां
वनं जलं तद्वत् आ[illegible] वनात्मा चंद्रस्तेन तुल्यं वदनं मुखं यस्यास्तां तां वनात्मवदनां॥ किं कृत्वा॥ खे आकाशे तर्वर्यारिप्रदं समुत्थितं
उदीक्ष्य॥ तत्र यो[illegible] मरिरग्निस्तर्वर्यारिः उदकं तत्प्रददातीति तर्वर्यारिप्रदो मेघः॥ तं दृष्ट्वा मदकलो हर्षविह्वलः कलभिः सह वर्तते स
कलानां सक[illegible] स्तां बभाषे॥ १॥ हे अंजदक्कमलनेत्रे गिरितटेषु कुमातङ्गान् पश्य अवलोकय॥ कुत्सिता मातङ्गा अबातसमाना
आहूनामग्रघातान् कदंबानित्यर्थः॥ कथंभूतान् कदंबान्॥ भदेवराजरिपुशत्रुसमावधूतान्॥ भदेवा ब्राह्मणास्तेषां राजा चंद्रस्तस्य
रिपुर्मेघः तस्य शत्रुर्वातः तेनावधूतान्॥ पुनः कथंभूतान्॥ दृक्श्रोत्रशत्रुभिरुपासितपुष्पशोभान्॥ दृगेव श्रोत्रं एषां ते दृक्श्रोत्राः सर्पा

कश्चिद् बहुवनं तु वने विचरन् वयस्थो वश्यां वनात्मवदनां वनितां बभाषे॥ तर्वर्यारिप्रदमुदीक्ष्य समुत्थितं खे नागाभिमो मदकलः सकलां
बभाषे॥ १॥ पश्याङ्गदङ्गिरितटेषु कुमातङ्गान् हे भदेवराजरिपुशत्रुसमावधूतान्॥ वैश्वानरारिजगरिपुभ्रशराभिभूते
दृक्[illegible]श्रोत्रशत्रुभिरुपासितपुष्पशोभान्॥ २॥ पश्याद्रिसारसदृशाभिरद्भिरद्रिराप्लावयत्यमरगुप्धरणीमहिघ्नः॥
अध्वसिताभिरसितः शबलः खगाभिर्वाजैः सितैरिव विभाति वनं प्रबुद्धैः॥ ३॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

स्तेषां रिपवो मयूरास्तैरुपासितपुष्पशोभा येषां तान्॥ कथंभूते दृक्श्रोत्रशत्रुभिः॥ वैश्वानरा॥ सरितजगरिपुभ्रशराभिभूते॥ वैश्वानरस्य
रिपुरुदकं तत्र जाता नागास्तेषां रिपुः कैवर्तकः स्तत्पर्यङ्को नाम तं हतवान् असौ कामस्तस्य शराः बाणास्तैरभिभूते॥ २॥ हे कमल
नेत्रे पश्य॥ अमरगुप् अमरान् देवान् गोपायति रक्षतीति अमरगुप् शक्रः॥ धरणीं पृथ्वीं अद्भिः अद्रिः तोयैः आप्लावयति॥ कथंभूता
भिरद्भिः अद्रिसारसदृशाभिः पर्वतसारतुल्याभिः॥ कथंभूतो अमरगुप् अहिघ्नः॥ अहिर्वृत्रासुरः तं हतवान्॥ अहिर्वृत्रासुरे सर्पे स
प्रः अध्वः॥ अपोहतानासर्वो मेघः॥ खगाभिः खं आकाशं गच्छतीति खगा बलाकास्ताभिः शबलश्चित्रः॥ कथंभूताभिः खगाभिः सिताभिः
शुक्लाभिः॥ कथंभूतो मेघः असितः कृष्णः भाति नवेजलैर्विभाति शोभते कैः वाजैः वारिसमानापो वारिशावः तस्मात् जातैः वाजैः
कमलैः कथंभूतैः सितैः शुक्लैः॥ पुनः कथंभूतैः प्रबुद्धैः पुष्पितैः॥ ३॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

लोहाभाभिः

७२३६

Accession No:- ~~7236~~ M1203

Author - ?

Title :- शब्दालंकाव्य सटीक

Subject :- ?

Date :- सं. 1796.

पत्रे :- 7

①

Checked 2012

घतं।

गवि तिष्ठतीति गोष्ठं पानीयं सुघनवाग्भिरिति सुघनं नीरं वहंतीति सुघनवाहा रश्मयस्ताभिरम्नुभिः अगम्यं भवं अगम्यं गोभिरश्मिभिः समुद्धरति यद्बहुधा प्रकारं प्रकारेण चापलस्य यः। कः असौ हिमघ्नः अग्निस्यः। गो सुरश्मिषु भवं गव्यं नीरं अंबरगतं आकाशस्थं। शिखी अग्निः तं घ्नातो ऽग्र्मः सज्वालोयस्यस मेघः तं स्वछं विस्यंदमानं स्रवनं अभिवर्द्धयति। समंतात् करोतीति हरः अतो मो जानु अभिजानु त्रिणेहान् इत्यादि कांतायाः कथयति॥४॥ अस्युरोहतीत्युद्भूपर्णं तस्य पलाशं पत्रं तत्सन्निभे हरितौ नेत्रे यस्याः सा घना ऽज्ञातं घनज्ञं नरहस्त्वाशरीरं यस्य स घनजालो चंद्रः क्षीरोदमथनोत्पन्नः तेन तुल्यं वक्त्रं यस्याः सा घनजालवक्त्रा इत्यर्थः। वाचौ हंसस्तस्य स्वरो यस्याः सा तथा वागिति चरतीति वाचौ हंसः इभनिभगा इभो हस्ती तेन तुल्यं गमनं यस्याः सा इभनिभगा। गजदोः समोरुरिति। गजो हस्ती तस्याः दोः करः तेन समौ ऊरू जंघे यस्याः सा गजदोः समोरुः॥ सीरो हलं यस्यास्तीति सीरी बलभद्रः तस्य ध्वजस्तालवृक्षः तस्य प्रसवाः पल्लवानि फलानि॥

गोष्ठं घनं सुघनवाग्भिरम्भिरगम्यं गोभिः समुद्धरति यद्बहुधा हिमघ्नः॥ गव्यं यदंबरगतं शिखिजालसंस्थं विस्यंदमानमभिवर्द्धयतीह मो जानु॥४॥ अस्युद्भपलाशनिभदृग्घनजालवक्त्रा वाचंहस्वरे भनिभगा गजदोःसमोरुः॥ सीरीध्वजप्रसवतुल्यविषाहा हासैर्या संगता प्रमुदिता प्रसमीक्ष्य वार्दं॥५॥ स्वर्याशुनामपतिरुन्नतहंसगामी वाग्नामभिः परिवृतो विषनामदाभिः उक्षावरः प्रमुदितः प्रतिनानदीति गर्जंतमीक्षणहितो वृषतुल्यरूपं॥६॥

श्रा

विषं पानीयं तेन समाना तुल्या नाम यस्य तद्विषाह्वं क्षीरं विषाह्वं दुग्धं तोयैनो विषाह्वैस्तैनो सीरीध्वजप्रसवतुल्यौ विषाह्वौ यस्याः सा सीरीध्वजप्रसवतुल्यविषाह्वा। तालफलवदुन्नतस्तनीत्यर्थः॥ हासैः नायकात्पुरुषोत्तमेन संगता सहिता। सा तैः प्रहृष्टा। प्रसमीक्ष्य वार्दं वारि ददातीति वार्दो मेघस्तं दृष्ट्वा प्रमुदितेत्यर्थः॥५॥ स्वर्यो अग्निर्दिवस्पतिस्तस्याशवो रश्मयः। स्वर्याशुनाम्ना तुल्यं नाम यासां ताः। स्वर्याशुनाम्नो गावः। स्वर्याशुनाम्नां गोपतिरित्यर्थः॥ उन्नतहंसगामी उन्नतशिराः सर्पगामी चेत्यर्थः। वाक् शब्देन गौरुच्यते। वाग्नाम्ना तुल्यं नाम यासां ताः वाग्नाम्नो गावः ताभिः वाग्नामभिः परिवृतः परिवेष्टितः। कथंभूताभिः वाग्नामभिः। विषनामदाभिः विषं जलं तत्पनाम यस्य तद्विषनाम क्षीरं तद्ददतीति गावः। ताभिः उक्षावरो वृषभो प्रमुदितः प्रहृष्टः प्रतिस्पर्द्धमानो हृद्यर्थं नदतीत्यर्थः॥ गर्जंतमीक्षणहितो वृषतुल्यरूपं इति। ईक्षणानि नेत्राणि तेभ्यो हितं अंजनं तस्यो वृषस्तेन तुल्यं रूपं यस्य स ईक्षणहितो वृषतुल्यरूपो मेघः तं प्रतिगर्जतीति नदतीत्यर्थः॥६॥

प्रमुदिता२

॥१॥

नी२

एनमितिप्रसक्तंनि[illegible]र्दिं॥ आति॥ पयः क्षीरं ददंतीति पयोदाः [illegible] गावः तासां पतिर्वृषभः पयोदपतिः किंतदित्याह॥ उन्नत उन्नतं पयोदप योजलं ददातीति पयोदो मेघस्तं कथंभूतं स्वस्छं स्वे आकाशे तिष्ठतीति स्वस्छं तं प्रतिगर्जतीव॥ कथंभूतः पयोदपतिः महीतलंगतः भूस्छः॥ किं कृत्वा भूवनीमि उर्वीं भित्वा विदार्य शिरोरुहाभ्यां॥ शिरसि [illegible]रोहत इति शिरोरुहे शृंगे ताभ्यां हे वनरुहाक्षि वनमंबुतत्ररोहतितद्वनरुहं कमलं तद्वदक्षिणी यस्याः सा तस्याः संबोधनं॥ कथंभूतः पयोदपतिः संप्रस्छितः प्रस्छाने प्रवृत्त इत्यर्थः॥ पुनः कथंभूतः अभ्रंतधरैरभिषिच्यमानः अभ्रंतेउदकं तद्धारयंतीति अभ्रंतधरा मेघास्तैरभिषिच्यमान इत्यर्थः॥ ७॥ हे अब्जदृक्पयोजलेतज्जातं कमलं तद्वदेव दृशौ नेत्रे यस्याः सा तस्याः संबोधनं॥ शुचिशुक्रमासे ज्येष्ठाषाढयोर्मासयोः विषधराः विषंपानीयं तद्धारयंतीति मेघाः विषंजलंपरिनिर्वपंति वर्षंति कथंभूतमंबुविषधराः मासकोः मासकार्थे मासशब्दः नभस्यनभसो भाद्रश्रावणयोः तीव्रं संपन्नं

एनेपयोदपतिरुन्नमितंपयोदं स्वस्छं महीतलगतः प्रतिगर्जतीव॥ भित्वावनौ वनरुहाक्षि शिरोरुहाभ्यां संप्रस्थितोभ्रतधरैरभिषिच्य
तरा मानः॥७॥ स्त्रोतोजविक्षतजभूधरधातुरूपाः स्वस्छापयोजसमदृक् शुचिशुक्रमासे॥ मासोर्नभस्यनभसोरतिसंपतंतस्तीव्रंवि
षंविषधरापरिनिर्वपंति॥ ८॥ स्वयोनिभक्षघनसंभवानां श्रुत्वाभिनादंगिरिगह्व~~रस्को~~ रस्थः॥ नभोरिबिंबप्रतिबिंबधारी वि
रौति कांतेपवनाशनाशः॥ ९॥ श्रीरस्तु॥ रामोजयति॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥श्रीरस्तु॥

तः॥ अपरतः पुनः कथंभूताः विषधराः स्त्रोतोजविक्षतजभूधरधातुरूपाः॥ स्त्रोतसिजातं स्त्रोतजं कमलं विक्षताज्जातं विक्षतजं रुधिरं भूधरा गिरयस्तेषां धातवः सुवर्णगैरिकादयः स्त्रोतोजंच विक्षतजंच भूधरधातवश्च तैस्तुल्यंरूपं येषां ते स्त्रोतोजविक्षतजभूधरधातुरूपाः पुनः कथंभूताः स्वस्छाः स्वे आकाशे तिष्ठतीति स्वस्छाः इति संबंधः॥ ८॥ स्वश्चासौ योनिश्चेति स्वयोनिः स्वस्यात्मनो योनिरुदकं उत्पत्तिस्छानं तद्भक्षंतीति स्वयोनिभक्षो अग्निर्वडवानलः जलभक्षत्वात्॥ यद्वा स्वस्यात्मनो योनिरुदकं उत्पत्तिस्छानं काष्टं तद्भक्षत्वं तीति स्वयोनिभक्षो अग्निस्तस्य ध्वजो धूमः तद्भवा मेघास्तेषामभिनादं श्रावं श्रुत्वा कुत्र गिरिगह्वरस्छः पर्वतगुहास्छितः सन् नभोरिश्चंद्रः तस्य बिंबं तत्प्रतिबिंबधारि प्रतिक्षेपे चंद्रकं बिभर्ति॥ विरौति नदति हे कांते पवनो वायुः तमश्नातीति पवनाशनाः सर्पाः पवनाशनं अश्नातीति पवनाशनाशो मयूरः इति समुदायार्थः॥ ९॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

3

असौ समाद्रिदैत्यद्विजगोत्तमशत्रुगोपः प्रतिराजते सत्यपाश्वाः अद्रयः पर्वताः दैत्याः असुराः द्विजगोत्तमः तेषां शत्रुरिं हस्तं गोपाः पाति रक्षतीति
सन्तथा इदृश्यर्थः। कथंभूतः गोष्ठः गाविति ष्टति। पुनः कथंभूतः इन्द्रगोपः। कुंकुमवपुः कुंकुमेन केसरेण सदृशं तुल्यं वपुर्यस्य स कुंकुमवपुः
[illegible]लं। खे आकाशे अध्वरं दृष्ट्वा आपो धारयतीत्यध्वरो मेघः तं कथंभूतं अध्वरं उवरेधराभं उवरेधरो पर्वतस्तद्वदाभा यस्य सः तं। पुनः क
थंभूतं। अचिरोस्थितं अभिनवोत्थितं इत्यर्थः। अहिहा नृत्यति। अहिः सर्पस्तं हंतीति अहिहा मयूरः। कथंभूतः प्रमुदितः आनंदयुक्तः। पुनः कथं
भूतः। हिमहाहूयानः हिमं हंतीति हिमहा अग्निः हिमहा हिमहाहूयानं यस्य असौ हिमहाहूयानो मयूरः ॥१०॥ असौ अध्वरः अपो धारयंतीति
अध्वरो मेघस्तोयं जलं क्षरति वर्षति। अत्र जलस्य निरंतरं पृथास्यात्तथा। कथंभूतो अध्वरः कलिश्यामवर्णः। अन्याविभाविति अन्यौ विभाव
ध्वरो अन्यस्यइमानौ क्षरंतः। वर्षंतः इति। काविव रणगतो इभराजाविव स्थितो यथा रणे वर्तमानौ गजराजौ शीकरांभसा क्षरंतो वर्षंतस्त

मूलं

गोष्ठाश्व कुंकुमवपुः प्रतिराजते सौ समाद्रिदैत्यद्विजगोत्तमशत्रुगोपाः उवरे धराभमचिरोस्थितमध्वरं खे दृष्ट्वाहि हा प्रमुदितो हिम
हाहूयानः १० कृष्णोध्वरः क्षरति तोयमसावजस्रमन्याविभौ रणगताविव वेभराजौ अन्ये त्वमी द्विरदवृंदनिभाः क्षरंतः
प्रछादयंत्यमरवृंदविमानमार्गं ११ वार्दाः खगाः क्षितिधरागमनप्रकाशा नेमीभरासमतुरंगमतुल्यघोषाः वाद्यीरिताः खम
वस्यवनं क्षरंतो वार्भिः क्षितिं घनधराः परिनिर्वपंति १२ श्रीरामार्पणमस्तु

मौ मेघौ काशब्दः अस[illegible]रे। अन्येरुशब्दः पुनरर्थे अध्वरा मेघाः क्षरंतः संतः अमरवृंदविमानमार्गं प्रछादयंति। अमराः देवाः तेषां वृं
दः समूहः तस्य विमानं मार्गं पंथानमिति कथंभूता। अमी द्विरदवृंदनिभाः द्विरदा हस्तीनस्तेषां वृंदः समूहः [illegible]निभास्तत्सदृशा इत्यर्थः ॥११॥
घ तं नीरं तन्वायतीति घनधाराः मेघाः वारि समानार्थो वारि शब्दः वा[illegible]र्भिः जलैः। क्षितिं पृथ्वीं परिनिर्वपंति। वर्षंति। किं कुर्वंतः वनं क्षरंतः
किं[illegible]त्वा खमवस्य आकाशं व्याप्य। कथंभूता घनधराः। वाद्यीरिताः वायुना क्षिप्ताः। पुनः कथंभूताः वार्दाः। वारि ददातीति वार्दाः मेघाः। पुनः
कथंभूताः खगाः खे आकाशे गच्छंतीति खगाः पुनः कथंभूताः क्षितिधराः। गमनप्रकाशाः क्षितिधराः पर्वतास्तेषां आगमनमार्गं तस्त
स्य प्रकाशात्सदृनीलाः। आगमनकाले च सादृश्यं। पुनः कथंभूताः। नेमीभरासमतुरंगमतुल्यघोषाः नेमी रथचक्रं इभो हस्ती रासभो
गर्दभः तुरंगमोश्वः नेमी च इभश्च रासभश्च तुरंगमश्च नेमीभरासभतुरंगमाः तेषां तुल्यो घोषो येषां ते ॥१२॥ ॥श्रीरस्तु

२

हेसुगात्रि श्रोभनेगात्रं शरीरं यस्याः सा तस्याः संबोधनं हेसुगात्रि। एषभुजंगमारिस्तिष्ठति। भुजंगमः सर्पः तस्य अरिः मयूरः सखि
मत्वा अघ्रिपाशनरिपुघ्नसुतारिसाहूमारूह्य अघ्रिभिः पिबंतीति अघ्रिपाः वृक्षाः तानश्नातीति अघ्रिपाशनोऽग्निः तस्यरि
पुरुदकं तद्धरतीति रविस्तस्य सूनुः कर्णस्तस्य रिपुः अर्जुनः तत्समाननामा यस्य सोऽर्जुनकुकुभवृक्षस्तमारूह्य रोहंतं ब्रू
त्वाहेबाले यस्य प्रसुप्तिस्तस्य प्रहृष्टस्य स्वनैः शब्दैः श्रुत्वा मन्याघास्मिन्नहनी तालध्वजावरजसुतशराः पतंति। तालध्वजोब
लभद्रः तस्यावरजः कनीष्ठो श्रीकृष्णः तस्य सूनुः कामदेवस्तस्य शराः बाणाः पतंति १३ एषः वार्जः उस्रामयं अस्ति
रवादृति उस्रा गावस्तासामयं गोमयं दुग्धमित्यर्थः। वारिजातो वार्जः कमलः सर्प इत्यर्थः। कथंभूतो नाद्विजः द्वौ वारौ जन्म यस्य सः
पुनः कथंभूतः। तथैवार्ण्यः स्थलगतः जलेभ्यो निःसृत्य स्थलभुष्ठमभिप्राप्तः। पुनः कथंभूतः हरिदृक् हरिर्गजः तस्येव दृशौ यस्य

एषोऽघ्रिपाशनरिपुघ्नसुतारिसाहूमारुह्य तिष्ठति सुगात्रि भुजंगमारिः। यस्य स्वनैः प्रसुप्तितस्य ममाघ बाले तालध्व
जावरजसूनुशराः पतंति १३ उस्रामयं स्थलगतोऽपि तथैव वार्ण्यो वार्जोऽद्विजो हरिरगेष दृशार्द्ररूढः। वाताशनख
शायनः स्मरति स्थलस्य चक्षुःश्रवाननभवः सुरशत्रुनामा १४ पक्षस्वमेधतुरगप्रतिमोपवलग्रे वाहैनबहूनि
समाहूयते खरिघ्नः मेकस्तथैव स्वशनाशनमेघवर्णः शब्दं करोत्यतिभृशं विषराशिमग्नः १५ श्रीरस्तु

सः पुनः कथंभूतः दृशार्द्ररूढः दृशा नाम ईदृशाई पंचपंचभिः कच्छपो दृष्टिगूढः परिवृतश्चरतीत्यर्थः। पुनः कथंभूतः वनभवः
वने जलं तस्मादुद्भवो यस्य जन्म सः चक्षुरेव श्रवणे यस्य सः चक्षुःश्रवाः सर्पः स्थलस्य स्मरति ध्यायति। स्थलस्येति कर्मणि षष्ठी। स्व
त्यर्थे कर्मण्यनेन सूत्रेण। कथंभूतः वातमश्नातीति वाताशनः। पुनः कथंभूतः स्वशायनः स्वशून्ये विवर्ते क्षि शयनं यस्य सः पु
नः कथंभूतः सुरशत्रुनामा सुरेभ्यः तस्य शत्रुः स्वासुरस्तस्य नाम यस्य सः सर्प इत्यर्थः १४ पक्षि(पे) हे पक्षमस्तीति पक्षी मयूरः वाहीम
तिनबहुसमाहूयंते। वाई ददातीति वार्दे मेघः ते कथंभूताः अश्वमेधो यस्य सः तस्य तुरगस्तत्प्रतिमा पुनः कथं० अग्रवलग्रे अग्रे चैवल्गिने
नालपीतारयोयस्य सः पुनः कथंभूतः अहिघ्नः अहिः सर्पः तं हंतीति सः मेकस्तथैव अतिभृशं शब्दं करोति। कथंभूतः स्वशनमश्नाति
तिस्वशनाशनः सर्पः तेन वेघाः बालीयस्य सः स्वसनाशनमेघवर्णा मेदुरः पुनकथं० विषराशिमग्नः विषेण पानीयेन तस्य राशौ मग्नः प्रविष्ट इ
त्यर्थः १५

विष्किराः पक्षिणः तेषां वनं विष्किरावनं कोटरं किंशुकादिनामिति दीर्घः। वनपुरोगे सादिनाणत्वं। विष्किरावणे उपेत्य आगत्य नापु
रुषः अनया समेतः संयुक्तः आक्रीडते कथंभूतेनान्। मधुकलः मदेन मत्तः कथंभूतं वनं कुसुमात्तसाहं। कुसुमान्यासमाना यस्य
तत् कुसुमात्तसाहं करेवं कुवनमित्यर्थः तु पुनः। अन्योयं नाम पुरुषः रमया सह पयः प्रतिज्ञां वृणीते पतिसमुद्रस्तत्र जातं उत्स
नं गोजं दुर्वासा हूयमित्यर्थः कथंभूतं गोजं। मणिवराभं मणिवरे इन्द्रनीलस्तत्तुल्या भा कान्तिर्यस्य तन्मणिवराभं १६
असौ नरः अमूनि सरोरुहाणि कमलानि भिन्नचित्रिष्णितोति गिकिं कुर्वन् स्पृशन् विभ्रन् स्पृशन् नखैः विभ्रन्नम्र चूते कथंभूतं स्पृशन्तं महतं दीर्घपुनः
कथंभूतं क्षतजवर्णनिभं क्षतजं रक्तं तस्मात्जातं रुधिरं तस्येव वर्णेरिकस्तोनिभं तस्सदृशं च पुनः। वयस्थः वयसि तिष्ठतीति वयस्थः।
तज्जेन चापिरजसा तत्सरोरुहजातेन कल्पया आप्लोतिभिश्चये चनितांपिस्र यं अपुमुहूर्तिनि आलीषति अनक्षिरीति। कथंभूताव

नाविष्किरावणमुपेत्य कुसुमात्तसाहमाक्रीडते मधुकलो रमयासमेतः। अन्यस्त्वयं मणिवराभमुपैत्य गोजं नाराम
यासह पयः प्रतिज्ञां वृणीते १६ स्पृशन्नमहत्क्षतजवर्णनिभं नरोसौ विभ्रन्नमूनि च पिनक्ति सरोरुहाणि तज्जेन
चापि रजसा वनिता वयस्थो प्यभ्युहूरसवर्कर समभिषिच्यमानः १७ पंके निमग्नमिव कर्द्दम[illegible] मदः सवारी
गर्जंतिभिक्षपदयरदंदमिवाविभाति वापीमनामदनचित्रतनुः सुपर्णो योषिद्धतः समदनः प्रतिरोरवीति १८

वयस्थः अभिषिंचमानः जलैरित्यर्थः १७ अदः रदानीदभसम्नं हंगजसमूहं अत्र भाति शोभते। कथंभूतं गजसमूहं।
पंके निमग्नं। कर्द्दमेन लिप्तं। पुनः कथंभूतं वारिदानां सह वर्तते ते सवारिदः किं कुर्वन्तं भिक्षापदरदं दमिव वाक्षिप्य योमस्यास्ते
षां क्षयेमिवासां गृहमिति स दृशनीतिभिक्षयद्रामेघास्तेषां दृदमिव कृष्णत्वात् साधारणे। सुपर्णो मयूरः शोभनानि पर्णा ३
नि यस्य सः सुपर्णो मयूरः प्रतिरोरवीति अतिशयेन शब्दं करोतीत्यर्थः॥ कथंभूतः सुपर्णः वापीमनामदनेषिचन्तु तनुः। वा
रिजलं तत्सकूप आलोदे होएषां वा पीमनस्तेषां क्रीडा तां अदनेन भक्षणेन भक्षणेन चित्रता अनेक वर्णा तनुर्यस्य
सः पुनः कथंभूतः योषिद्धिर्मयूरीभिर्वृतो वेष्टितः पुनः कथंभूतः समदनः सकामः इत्यर्थः १८ अथो गोपाल कल्पय

एषा नरः अनोकहनिष्ठुरस्थः संलीयते प्रतिविशति अनोकहाः कृताशालः निष्ठुरस्थः कोटरस्थः ॥ कथंभूतां गिरिं शुभार्मुकं ॥ पुनः
कथंभूतः विस्फारिताधररवेण शब्दितं जलदशब्देन संत्रासितः भययुक्तः पुनः कथंभूतः तडितं विद्युतं अभिवीक्ष्य दृष्ट्वा
विग्नः उद्विग्नः अपितिश्चये असौ प्रसक्षः सम्यक्प्रकारेण स्वशत्रुसंरवात् स्वं अनुप्रविष्टः बिलात् बीलं दूरं प्रविष्ट इत्यर्थः
कथंभूतं स्वंमहत्तरं अतीशयेन दीर्घं १९

विस्फारिताधररवेण गिरिं श्रुरेषसंत्रासितो हरिवनोकहानिष्ठुरस्थः संलीयते तडितमप्यभिवीक्ष्य विग्नः
स्वालंबमहत्तरमसौ समनुप्रविष्टः १९ एतावदुत्तमवचः सुमनास उच्चारलोदिने सहतया प्रियया सक्षी
णः युक्तं चतुर्भिरनडुभिरदीनवह्निरोरुह्यमाने मथसे प्रययौ स्वगेहे २० इति राक्षसकाव्यं समाप्तं ॥

अथ यानेतरे ससुमनाः शोभनं मनो यस्य सः स्वगेहे आलयं गृहे संप्रययौ जगाम । किं कृत्वा । याने आरुह्य । याने रथ उच्यते ॥ ४
कथंभूते याने चतुर्भि अनडुभिः वृषभिर्युक्तं कथंभूतै रनडुभिः अदीनवह्निः अदीनं मांसं यथा स्यात्तथा वहंति सदीनवाह
तै वलिभिरित्यर्थः ॥ पुनः किं कृत्वा तानि वादीति यो व्यालंकारेण तं मवचः उक्तं कथमपि लोकमसः किं कृत्वा दिने दिवसे सहतया प्रिय
यासहरिमता कथंभूतः अक्षिणः पुष्ट इत्यर्थः हीतिपादपूरणे २० इति राक्षसकाव्यस्य टीका समाप्तं संवत् २६ ॥

K K S U LIBRARY
RAMTEK
441 106
M1203
Dist Nagpur

7

```
[OrderDescription]
,CREATED=21.10.20 14:30
,TRANSFERRED=2020/10/21 at 14:31:44
,PAGES=7
,TYPE=STD
,NAME=S0004303
,Book Name=M-1203-RAETRAT KAVYA SATIK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,
```